Roll No……………………….
Signature of Invigilator ………

Paper Code

MV-305

# पतंजलि विश्वविद्यालय

## University of Patanjali

**Examination March-2021**

**एम. ए. व्याकरण, तृतीयसत्रम्**

**व्याकरणम्, पंचमपत्रम्**

**संस्कृतसाहित्यम्**

समयः - होरात्रयम् पूर्णाङ्काः 70

---

**अवधेयम्: प्रश्नपत्रामिदं ‘क’ ‘ख’ इति खण्डद्वये विभक्तमस्ति प्रतिखण्डमङ्कनिर्देशो द्रष्टव्यः। प्रदत्तनिर्देशानुसारमेव प्रश्नानामुत्तराणि लेखनीयानि, सर्वे प्रश्ना अनिवार्य।**

**(खण्ड - क) 56 अङ्काः**

1. **ऋग्वेदादिभाष्यभूमिकामनुसृत्य प्रदत्तयोर्द्वयोर्मन्त्रयोः कस्यचिदेकस्य व्याख्या विधेया - (8X1=8)**

(क) इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयातै।
चर्कृत्य ईड्यो बन्द्यश्चोपसद्यो नमस्योऽभवेह।।

(ख) यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह।
तं लोकं पुण्यं प्रज्ञेषं यत्र दवाः सहाग्निना।।

2. **ऋग्वेदादिभाष्यभूमिकानुसारं राजधर्मस्य विवेचनं कुरुत।**

*अथवा*

**विद्यासभायाः स्वरूपं प्रतिपादयत (8X1=8)**

3. **तेय शतं मानुषा ………… इत्युपनिषद्वाक्यं पूरयित्वा तस्य यथायथं व्याख्या कार्या।**

*अथवा*

**स यश्चायं पुरुषे ………………… इत्युपनिषद्वाक्यस्य पूर्तिं कृत्वा व्याख्यानं कुरुत। (8X1=8)**

4. **ब्रह्मानन्दवल्लयाः सारांशो लेखनीयः। (8X1=8)**
5. **छन्दोऽलङ्कारादिनिर्देशपुरस्सरं प्रदत्तेषु पद्येषु कयोश्चिद्द्वयोः सप्रसङ्गं व्याख्यानं कुरुत। (6X2=12)**

(क) ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः।
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः।।

(ख) शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतिम्।
विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः।।

(ग) उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः।
अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति।।

6. अधोलिखितेषु पद्येषु केषाञ्चन त्रयाणां व्याकरणादिटिप्पणीनिर्देशपुरस्सरं व्याख्या विधेया – (4X3=12)

(क) नाकुण्डली नामुकुटी नास्रग्वी नालाभोगवान्।

नामृष्टो न न लिप्ताङ्गो नासुगन्धश्च विद्यते।।

(ख) राज्यं हि यदि रामस्य भरतस्यापि तत्तदा।

मन्यते हि यथात्मानं तथा भ्रातृंश्च राघवः।।

(ग) धर्ममाश्रय मा तैक्ष्ण्यं मद्बुद्धिरनुगम्यताम्।

द्वेष्यो भवत्यर्थपरो हिलोके कामात्मता खल्वति न प्रशस्ता।।

(घ) तस्याः शङ्कामयं दुःखं मुहूर्त्तमपि नोत्सहे।

मनसि प्रतिसंज्ञातं सौमित्रेऽहमुपेक्षितुम्।।

## (खण्ड – ख) 14 अङ्काः

7. देवस्य त्वा ................. इत्यस्य मन्त्रस्य पूर्ति कृत्वा लिखत –

*अथवा*

राजप्रजाधर्मविषये लघुनिबन्धो लेख्यः। (4X1=4)

8. ते ये शतं प्रज्ञापते........ इत्यस्योपनिषद् वाक्यस्यं पूर्तिं कृत्वा तस्यार्थः स्पष्टीकरणीयः (4X1=4)

9. अधःप्रदत्तयोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या। (3X1=03)

(क) नियतिं लोक इवानुरूध्यते।

(ख) नयहीनादपरज्यते जनः।

10. रामायणपाठस्य किं फलमिति स्वशब्दैलिखत।

*अथवा*

रामाभिषेके दशरथस्य भावाभिव्यक्तिं वर्णयत। (3X1=03)

---------------x---------------